३ तस्यास्तां धर्म एवमनीषिणः २५ दुदोह गां स यज्ञाय सस्याय म
घवा दिवं संपद्विनिमयेनोभौ दधतुर्भुवनद्वयं २६ न किलानुय
युस्तस्य राजानो रक्षितुर्यशः व्यावृत्ता यत्परस्वेभ्यः श्रुतौ त
स्करता स्थिता २७ द्वेष्योपि संमतः शिष्टस्तस्यार्तस्य यथौ
षधं त्याज्यो दुष्टः प्रियोप्यासीदङ्गुलीवोरगक्षता २८ तं वे
धा विदधे नूनं महाभूतसमाधिना तथा हि सर्वे तस्यासन्प
रार्थैकफला गुणाः २९ स वेलावप्रवलयां परिखीकृतसागरां
अनन्यशासनामुर्वीं शशासैकपुरीमिव ३० तस्य दाक्षिण्यरू ३

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वीधनुषि ज्यातता १९ तस्य संवृतमंत्रस्य गूढाकारेंगितस्य च फला
नुमेयाः प्रारंभाः संस्काराः प्राक्तना इव २० जुगोपात्मानमत्रस्तो भेजे
धर्ममनातुरः अगृध्नुरादेदे सोर्थानसक्तः सुखमन्वभूत् २१
ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः गुणा गुणानुब
न्धित्वात्तस्य सप्रसवा इव २२ अनाकृष्टस्य विषयैर्विद्यानां पारदृश्व
नः तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना २३ प्रजानां विनया
धानाद्रक्षणाद्भरणादपि स पिता पितरस्तासां केवलं जन्महेतवः
॥२४ स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये अप्यर्थकामौ

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

६ गंभीरनिर्घोषमेकस्यंदनमास्थितौ प्रावृषेण्यंपयोवाहं विद्युदैरा
वताविव ३७ माभूदाश्रमपीडेति परिमेयपुरस्सरौ अनुभावविशे
षात्तुसेनापरिवृताविव ३८ सेव्यमानौ सुखस्पर्शैः शालनिर्या
२ सगंधिभिः पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ३९ मनो
भिरामाःशृण्वंतौरथनेमिस्वनोन्मुखैः षड्जसंवादिनीः केका
द्विधाभिन्नाःशिखंडिभिः ४० परस्पराक्षिसादृश्यमदूरोज्झितवर्त्म
सु मृगद्वंद्वेषुपश्यंतौ स्यंदनाबद्धदृष्टिषु ४१ श्रेणीबंधाद्वित ६
न्वद्भिरस्तंभांतोरणस्रजं सारसैःकलनिर्ह्रादैःक्वचिदुन्नमितान

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ठेन नाम्नामगधवंशजा पत्नीसुदक्षिणेत्यादिसी दधू रस्येव दक्षि
णा ३१ कलत्रवंतमात्मान मवरोधेमह स्यपि तया मेने मनस्विन्या
लक्ष्म्या च वसुधाधिपः ३२ तस्यामात्मानुरूपायामात्मजन्मसमुत्सु
कः ३३ विलंबितफलैः कालं स निनाय मनोरथैः ३३ गंगाप्रगी
रथेनेव पूर्वेषां पावनक्षमां इच्छता संततिं तेन न्यस्ता मंत्रिषु को
शला ३४ संतानार्थाय विधये स्वभुजादवतारिता तेन धूर्जग
तो गुर्वी सचिवेषु निवेशिता ३५ अथाभ्यर्च्य विधातारं प्रयतौ पुत्रका
म्यया ते दंपती वशिष्ठस्य गुरोर्जग्मतुराश्रमम् ३६ स्निग्ध

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

५ धेन वि बुधोयमः ४८ सदुःप्रायपक्षाःप्रापदाश्रमं श्रांतवाहनः
सायं संयमिनस्तस्यमहर्षेर्महिषीसखः। ४९॥ नानोरा
दपावर्ते: स्कंधासक्तसमित्कुशैः अग्निप्रत्युद्गमात्पूतैःपू
र्णमानां तपस्विभिः ५० सेकांतेमुनिकन्याभिस्तत्क्षणोज्झितवृक्ष
कं विश्वासाय विहंगानामालवाम्बुपायिनाम् ५१ आतपात्य
यसंक्षिप्तनीवारासुनिषादिभिः ५२ मृगैर्वर्तितरोमंथमुटजांग
णभूमिषु ० ५२ आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः अपत्यै
रिव नीवारभागधेयोचितैर्मृगैः ५३॥ सेक्तुद्रुतान्नि(?)वेपुनैर्ति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नौ ४२ पवनस्यानुकूलत्वा प्रार्थनासिद्धिशंसिनः रजोभिस्तुरगोत्कीर्णै
रस्पृष्टालकवेष्टनौ ४३ ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनां
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ४४ हैयंगवीन॥
मादाय घोषवृद्धानुपस्थितान् नामधेयानि पृच्छंतौ वन्यानां॥
मार्गशाखिनां ४५ सरसीष्वरविन्दानां वीचिविक्षोभशीतलं आ॥
मोदमुपजिघ्रंतौ स्वनिश्वासानुकारिणं ४६ काप्यभिख्या तयोरासी
द्व्रजतोः शुद्धवेषयोः हिमनिर्मुक्तयोर्योगे चित्राचंद्रमसोरिव ४७
तत्तद्भूमिपतिः पत्न्यै दर्शयन् प्रियदर्शनः अपि लंघितमध्वानं बुबु॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तारिप्राः पुरः अर्थ्यामर्थपतिर्वाचमादेदवदतांवरः ६० उपपन्नंननुशिवंस
प्तस्वंगेषुयस्यमे दैवीनां मानुषीणांचप्रतिहर्तात्वमापदाम् ६१॥ तव
मंत्रकृतोमंत्रैर्दूरात्संशमितारिभिः प्रत्यादिश्यंतइवमेदृष्टलक्ष्यभिदः
शराः ६२ हविरावर्जितंहोतस्त्वयाविधिवदग्निषु वृष्टिर्भवतिस
स्यानामवग्रहविशोषिणां ६३ पुरुषायुषजीविन्योनिरातंकानि
4 रीतयः तन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ६४ त्वयैवंचिं
त्यमानस्यगुरुणाब्रह्मयोनिना सानुबंधाः कथंनस्युःसंपदोमेनि
रापदः किंतुवध्वांतवैतस्यामदृष्टसदृशप्रजं नमामवतिसद्वीपा

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

तिथीनाश्रमोन्मुखान् पुनानां पवनोद्धूतैर्धूमैराहुतिगंधिभिः ५४
अथ यंतारमादिश्य धुर्यान्विश्रामयेति सः तामवारोहयत्पत्नीं रथाद
वरुरोह च ५५ तस्मै सभ्याः सभार्याय गोत्रे गुप्ततमेंद्रियाः अर्हणामर्ह
ते चक्रुर्मुनयो नयचक्षुषे ५६ ॥ विधेः सायंतनस्यांते स ददर्श तपो
निधिं अन्वासीनमरुंधत्या स्वाहयेव हविर्भुजम् ५७ ॥ तयोर्जग
हतुः पादे राजा राज्ञी च मागधी तौ गुरुर्गुरुपत्नी च प्रीत्या
प्रतिननंदतुः ५८ आतिथेयस्तमातिथ्यं विनीताध्वपरिश्रमं प
प्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ५९ अथाथर्वनिधेस्तस्य विजि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

वीणस्पंदनः ७२ तस्माद्यथा विप्र मुच्येहं तथा त्वं कर्तुमर्हसि इक्ष्वाकूणां
७ दुरापेर्थे त्वदधीना हि सिद्धयः ७३ इति विज्ञापितो राज्ञा ध्यानस्तिमि
तलोचनः क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ७४ सोपश्यत्प्र
णिधानेन संततिस्तंभकारणं भावितात्मा भुवो भर्तुरथैनं प्रत्यबोध
यत् ७५ पुरा शक्रमुपस्थाय तवोर्वी प्रतियास्यतः आसीत्कल्पतरु
५ छायामाश्रिता सुरभिः पथि ७६ इमां देवीमृतुस्नातां स्मृत्वा सपदि
सत्वरः प्रदक्षिणक्रियातीतस्तस्याः कोपमजीजनत् ७७ अवजाना
सि मां यस्मादतस्ते न भविष्यति मत्प्रसूतिमनाराध्य प्रजेति त्वां स ७
शाप सा ७८ [redacted]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रत्नसूः विभेदिनी ६६ मत्परं दुर्लभं मत्वा नूनमावर्जितं मया पयः पू
र्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ६७ नूनं मत्तः परं वंश्याः पिंडवि
च्छेददर्शिनः न प्रकामभुजः श्राद्धे स्वधासंग्रहतत्पराः ६८ तया हीनं
विधातर्मां कथं पश्यन्न दूयसे सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्र
मपादपं ६९ सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः प्रका
शश्चाप्रकाशश्च लोकालोक इवाचलः ७० लोकांतरसुखं पुण्यं
तपोदानसमुद्भवं संततिः शुद्धवंश्या हि परत्रेह च शर्मणे ७१
असह्यपीडं भगवन्नृणमन्त्यमवेहि मे अरुंतुदमिवालानमनि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रजः कणैः खुरोद्भूतैः स्पृशद्भिर्गात्रमंतिकात् तीर्थाभि
षेकजां शुद्धिमादधाना महीक्षितः ॥८५॥ ... तां पुण्य
दर्शनां दृष्ट्वा निमित्तज्ञस्तपोधनः । याज्यमाशंसितावंध्यप्रा
६ र्थनं पुनरब्रवीत् ॥८६॥ अदूरवर्तिनीं सिद्धिं राजन्विगणयात्म
नः । उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ॥८७॥ वन्यवृ
त्तिरिमां शश्वदात्मानुगमनेन गां विद्यामभ्यसनेव प्रसाद
यितुमर्हसि ॥८९॥ प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः निषण्णा
यां निषीदास्यां पीतांभसि पिबेरपः ॥९०॥ वधूर्भक्तिमती चैनां

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सशापो न त्वया राजन्न च सारथिना श्रुतः । नदत्याकाशगंगायाः स्रोतस्युद्दा
मदिग्गजे ॥ ७९ ॥ अवेप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः । प्रतिबध्नाति हि
श्रेयः पूज्यपूजाव्यतिक्रमः ॥ ८० ॥ हविषे दीर्घसत्रस्य सा चेदानीं प्र
चेतसः । भुजङ्गपिहितद्वारं पातालमधितिष्ठति ॥ ८१ ॥ सत्वमेकान्तरां
तस्या मदीयां वत्स मातरं आराधय सपत्नीकः [illegible] ललाटोद
यमाभुग्नं पल्लवस्निग्धपाटला । बिभ्रती श्वेतरोमाङ्कं संध्ये
व शशिनं नवं ॥ ८४ ॥ भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथा
दपि प्रस्नवेणाभिवर्षन्ती वत्सालोकप्रवर्तिना ॥ ८५ ॥

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

शम: विनाद्दवाग्निरासीद्विशेषात्फलपुष्पवृद्धिः ऊनं न सत्त्वेष्वधिको बबाधे
११ तस्मिन्वनं गोप्तरि गाहमाने १४ संचारपूतानि दिगंतराणि कृत्वादि
नांते निलयाय गंतुं प्रचक्रमे पल्लवरागताम्रा प्रभा पतंगस्य मुनेश्च धेनुः पत्र२
१५ तां देवतापित्रतिथिक्रियार्थामन्वग्ययौ मध्यमलोकपालः ब
7 भौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना १६ सपल्व
लोत्तीर्णवराहयूथान्यावासवृक्षोन्मुखबर्हिणानि ययौ मृगाध्या
सितशाद्वलानि श्यामायमानानि वनानि पश्यन् १७ आपीनभारो
द्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेंद्र उभावलंचक्रतुरंचिताभ्यां
तपोवनावृत्तिपथं गताभ्यां १८ वसिष्ठधेनोरनुयायिनं तमावर्त २

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ञु रहो मधे नोर्वन्यान्विनेष्यन्निव दुष्टसत्वान् ८ विसृष्टपार्श्वानुच
रस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य उदीरयामासुरिवोन्मदानामालो
कशब्दं वयसां विरावैः ९ मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभि
वर्त्तमानं अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः १०
धनुर्भृतोप्यस्य दयार्द्रभावमाख्यातमंतःकरणैर्विशंकैः विलोकयंत्यो
वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ११ सकीचकैर्मारुतपूर्णरंध्रैः
कूजद्भिरापादितवंशकृत्यं शुश्राव कुंजेषु यशः स्वमुच्चैरुद्गीयमानं वन
देवताभिः १२ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपितपुष्पगंधी त
मातपक्लांतमनातपत्रमाचारपूतं पवनः सिषेवे १३ शशाम वृष्ट्यापि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

रामः शिलोच्चये मूर्छति मारुतस्य ३४ कैलाशगौरं वृषमारुरुक्षोः पादार्प
१२ णानुग्रहपूतपृष्ठं अवेहि मां किंकरमष्टमूर्त्तेः कुंभोदरं नाम निकुंभमित्रं
३५ अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोसौ वृषभध्वजेन यो हेमकुंभस्त
ननिःसृतानां स्कंदस्य मातुः पयसां रसज्ञः ३६ कंडूयमानेन कटं कदाचि
8 द्वन्यद्विपेनोन्मथिता त्वगस्य अथैनमद्रेस्तनया शुशोच सेनान्यमालीढ
मिवासुरास्त्रैः ३७ तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकु
क्षौ व्यापारितः शूलभृता विधाय सिंहत्वमंकागतसत्ववृत्तिः ३८ त
स्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण उपस्थिता शो
णितपारणा मे सुरद्विषश्चांद्रमसी सुधेव ३९ स त्वं निवर्त्तस्व वि

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

द्वैरः केसरीणां ददर्श अथिन्यकायं निवधानुमयां धुडुंमसानमतः लो१
प्रपुत्रं २९ ततो मृगेंद्रस्य मृगेंगामीनिवध्यायवध्यस्यशरं शमाप्तः ज्ञा
तामि छंगोन्नृपतिनिमंगादुद्वर्तुमैच्छ तप्रसमो धनुर्धारि: ३० वामेतरस्तस्य
करः प्रहर्तुर्नखप्रभाभूषितकंकपत्रे सक्तांगुलिः सायकपुंखएवचित्रा
र्पितारंभइवावतस्थे ३१ वाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्
स्पृशद्भिः राजास्वतेजोभिरदह्यतांतर्भोगीवमंत्रौषधिरुद्धवीर्यः ३२ त
मार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुं विस्माययन्विस्मि
तमात्मवृत्तौ भूपालसिंहं निजगाद सिंहः ३३ अलं महीपाल तव श्र
मेण प्रयुक्तमप्यस्त्रमितोवृथास्यात् नपादपोन्मूलनशक्तिरंहः शिला
CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham